# MASTER OF ARTS EXAMINATION, 2024

**(1st Year, 1st Semester )**

**SANSKRIT**

**COURSE : I**

**[ History of Sanskrit Literature and Ancient Indian Civilization ]**

*Time* : 2 Hours *Full Marks* : 30

*The figures in the margin indicate full marks.*

**1.** आधुनिकसंस्कृतसाहित्ये नाट्यकार यतीन्द्रविमल – चौधुरीमहोदयस्यावदानं समासत आलोचनीयम्। 6

**( अथवा )**

नित्यानन्दमुखोपाध्यायस्य जीवनीमूलकनाट्यकृतिः समासत आलोच्यताम्। 6

**2.** निम्नलिखितेषु प्रश्न**द्वयं** संस्कृतभाषया नागरीलिप्या च समाधीयताम् : 1×2=2

(क) मातृष्वसा इति लघुकथा केन कं विषयमाश्रित्य विरचिता ?

(ख) 'यमपुरी–पर्य्यटनम्' केन प्रणीतम् ? तत्र अङ्गिरसरूपेणः कः रसः स्वीकार्यः ?

(ग) तारापद–भट्टाचार्यस्य कृतीनां लघुकथाद्वयोरुल्लेखः कार्यः।

**3.** संस्कृतसाहित्ये महाकवेः भारवेः कृतिमाश्रित्य कश्चित् प्रबन्धो विरच्यताम्। 5

**( अथवा )**

नैषधचरितस्य माहात्म्यं विचार्यताम्। 5

**4.** निम्नलिखितेषु प्रश्न**द्वयं** संस्कृतभाषया नागरीलिप्या च समाधानं कार्यम् : 1×2=2

(क) माघस्य नामान्तरं किम्? शिशुपालबधे कति सर्गाः वर्तन्ते?

(ख) भट्टिकाव्ये कति काण्डानि वर्तन्ते? तेषां नामानि उल्लेख्यानि।

(ग) श्रीहर्षस्य नैषधचरितस्य बीजं किम्

**5.** 'पिटकम्' इति शब्दस्य कोऽर्थः? तच्च कतिविधम्? विनयपिटकस्य प्रतिपाद्यविषयः समासत लिख्यताम्। 6

**( अथवा )**

जैनग्रन्थे आगमेतरसाहित्यानां समासतो विवरणं प्रदेयम्। 6

**6.** सुरगिरा नागरीलिपिमाश्रित्य प्रश्न**द्वयं** समाधानं कार्यम् : 1×2=2

(क) दिगम्बरसमुदायस्य 'चतुर्वेद' इति ग्रन्थस्य नामानि लिख्यताम्।

(ख) कल्पसूत्रस्य भाष्यकारः कः आसीत्?

(ग) 'पद्मचरितम्' केन विरचितम्?





**7.** अशोकस्य धर्मनीतिम् अवलम्ब्य समासतः कश्चिन्निबन्धो विरच्यताम्। 5

**( अथवा )**

गुप्तयुगस्य विज्ञानप्रयुक्तिभावनायाः निदर्शनं यदुपलब्धं समासतः तदालोच्यताम्। 5

**8.** सुरगिरा नागरीलिप्या च निम्नोक्तेषु प्रश्नेषु **द्वयोः** समाधानं कार्यम् : 1×2=2

(क) मेगास्थिनिसमतानुसारं मौर्यसैन्यबलं कतिविधम्? तेषां नामानि लिख्यन्ताम्।

(ख) एलाहवादप्रशस्तिः केन प्रणीता? तत्र कस्य राज्ञो माहात्म्यं विशेषेण प्रकटितम्?

(ग) चतुर्थबौद्धमहासङ्गीतिः कुत्रानुष्ठिता अभवत्? तत्र कः सभापतेरासनमलंकृतवान्?

★★★